व्यासस्तुतिः (व्यासाष्टकम्)

श्रीशं विचित्रकवितारसपूरिताशं
श्रीशङ्करोरगखगेन्द्रहृदब्जवासम् ।
आशङ्कमानजनतृप्तिकरोक्तिहासं
व्यासं नतोऽस्मि हरितोपलसन्निकाशम् ॥ १॥

वेदान्तसूत्रपवनोद्धूतपञ्चवेदा-
मोदांशतोषितसुरर्षिनरादिभेदाम् ।
बोधाम्बुजातलसितां सरसीमगाधां
श्रीदां श्रितोऽस्मि शुकतातपदामखेदाम् ॥ २॥

द्वैपायनो जयति यन्निजशक्तिदीपः
पापाभिवर्धितकुबादितमिस्रतापः ।
पापाख्यदुर्भगदशाकृतितीव्रकोपः
पापाङ्गतौषधिरगे श्वसनांशरूपः ॥ ३॥

इन्द्रादिदैवतहृदाख्यचकोरचन्द्रा-
मन्दांशुकल्पशुभजल्पितपुष्पवृन्दः ।
वृन्दारकांध्युपलतागुणरत्नसान्द्रो
मन्दाय मे फलतु कृष्णतरुः फलं द्राक् ॥ ४॥

माता हितेव परिरक्षति येन गीता
गीताग्र्यभारतपुराणकृताऽविगीता ।
वातांशमध्ववरदः सगिरो ममैताः
ख्याताः पराशरसुतो विदधातु धाता ॥ ५॥

पारं भवाख्यजलधेर्भुवनैकसारं
स्वैरं कृतोरुविधवेदपथःप्रचारम् ।
आरञ्जितामरजनं सुखचिच्छरीरं
धीरं स्मरामि हृदि सत्यवतीकुमारम् ॥ ६ ॥

भावाश्रितं यमनुसृत्य भजन्ति देवाः
सेवारताश्च मुनयः कवयो नृदेवाः ।
यो वासुदेववपुरस्य महानुभावां-
च्छ्रीबादरायणहरेर्न गृणीत को वा ॥ ७ ॥

ज्ञानं प्रदेहि भवदागमवार्ध्यधीनं
श्रीनन्दसूनुपदभक्तिनदीनिदानम् ।
आनन्दतीर्थवरदोक्षमहाध्वनीनं
दीनं बदर्यधिपते कुरु माममानम् ॥ ८ ॥

वासिष्ठवंशतिलकस्य हरेर्मनोज्ञं
दोषौघखण्डनविशारदमष्टकं ये ।
दासाः पठन्त्यनुदिनं भुवि वादिराज-
धीसम्भवं परिभवो न दिशासु तेषाम् ॥ ९ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

व्यासस्तुतिः सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु